देश इत्येवं प्रकारा अतिदेशाः सन्ति ॥ लोके च गोसदृशो-गवयइत्यादौ रूपातिदेशइत्यादि । अतएवोपमानरूपप्रमाणे अस्यातिदेशवाक्यस्य करणत्वं सहकारिभावोवेत्यादि तत्त-च्छास्त्रकारैरङ्गीकृतम् अतिदेशेन निर्वृत्तम् ठक् । आति-देशिकं त्रि० । "आतिदेशिकविधिरनित्य" इति परिभाषा ।

**अतिधन्वन्** पु० अत्युत्कृष्टं धनुर्यस्य प्रा०ब० धनुषोऽनङ् । उत्कृष्टधनुर्युक्ते योधे । धन्वा मरुः अत्या०स० । मरुस्थ-लातिक्रमकारिणि त्रि० ।

**अतिधृति** स्त्री अतिक्रान्ता धृतिम् अष्टादशाक्षरपादिकां वृत्ति-मेकाक्षराधिक्यात् अत्या० स० । ऊनविंशत्यक्षरपादके छन्दोभेदे । धृतिर्धैर्य्यं सन्तोषो वा । तदतिक्रमकारिणि त्रि० ।

**अतिनु(नौ)** त्रि० अतिक्रान्तोनावम् अत्या०स० क्लीबे ह्रस्वः । नौकातिक्रमकारिणि । पुंसि स्त्रियां च अतिनौः ।

**अतिनिद्र** अव्य० निद्रा सम्प्रति न युज्यते अव्ययी० । निद्राया अयोग्यकाले । अतिक्रान्तो निद्राम् अत्या०स० । अतिक्रान्तनिद्रे निद्रारहिते त्रि० । अतिशयिता निद्रा-ऽस्य । दीर्घनिद्रे त्रि० । प्रा०स० । दीर्घनिद्रायां स्त्री ।

**अतिपत्ति** स्त्री अति+पत-क्तिन् । अतिपतने, अति-क्रमे । "कालातिपत्तौ द्विगुणामिति" स्मृतिः । पद-क्तिन् पत्तिर्निष्पत्तिः अत्या०स० । अनिष्पत्तौ स्त्री । "लिङ्निमित्ते लृङ् क्रियातिपत्ताविति" पा० । क्रियातिपत्तिः क्रियाया अनिष्पत्तिरिति वृत्तिः । पत्तिं सेनामतिक्रान्ते त्रि० ।

**अतिपत्र** पु० अतिरिक्तं वृहत्पत्रमस्य । हस्तिकन्दवृक्षे ।

**अतिप(थ)थिन्** पु० अतिशयितः सुन्दरः पन्थाः प्रा०स०अतेः पूजार्थत्वात् न समा० । सत्पथे । अतीतपथे तु समा० ।

**अतिपद** त्रि०अतिक्रान्तः पदं चरणम् । वर्णवृत्तानुसारिपादा-तिक्रान्ते "अतिपदा गायत्री अतिपदा जगतीति" ।

**अतिपन्न** त्रि० अति+पद-क्त । अतिक्रान्ते । "तथातिपन्न-शिशुसंस्कारास्वेति" मुहूर्त्तचि० ।

**अतिपरोक्ष** त्रि०अतिक्रान्तम् परोक्षम् । प्रत्यक्षे, तद्विषये च ।

**अतिपात** पु० अतिक्रम्य पातः गतिः अति+पत-घञ् । "अतिक्रमे "न चेत् कार्य्यातिपातः" इति शकु० ।

**अतिपातक** न० अतिक्रान्तोऽत्यन्तदुष्टत्वेनान्यत् पातकं अत्या० स० । पुंसां मातृस्नुषादुहितृगमनजन्ये, स्त्रीणाञ्च पुत्त्र-पितृश्वशुरगमनजन्ये पातकविशेषे । "मातृगमनं, दुहितृ-गमनं, स्नुषागमनञ्चेत्यतिपातकानीति" "अतिपातकि-नस्त्वेते प्रविशेयुर्हुताशनमिति" "एतेष्वकृतप्राय-श्चित्ता अतिपातकिनः पर्य्यायेण कल्पं पच्यन्ते" इति च विष्णुस० । "सद्योऽग्निप्रवेशनतिपातकिन" इति हारीतः । "अथ नरकानुभूततदुःखानां तिर्य्यक्त्वमुत्तीर्णानां मानुष्ये लक्षणानि कुष्ठ्यतिपातकीति" विष्णुस० । पातक-मतिक्रान्तवति पुण्यशीले त्रि० ।

**अतिप्रगे** अव्य० अतिप्रगीयतेऽस्मिन् काले अति+प्र+गै-के । अत्यन्तप्रातःकाले । "नातिप्रगे नातिसायं न निशीथे न चोषसीति" स्मृतिः ।

**अतिप्रमाण** त्रि० अतिक्रान्तः प्रमाणम् अत्या० स० । प्रमा-णातिक्रान्ते यस्य यत्प्रमाणमुचितं ततोऽधिकप्रमाणवति । प्रा० स० । अत्यन्तप्रमाणे वृहत्प्रमाणे न० ।

**अतिप्रवृद्ध** त्रि० अत्यन्तं प्रमाणातिरेकेण प्रवृद्धम् । प्रमाणाति-रेकेण वृद्धिमति । अतिप्रवृद्धिश्च नद्यादेर्जलस्य तीराद्यति-क्रमेण, क्षत्त्रियादेः स्वकर्त्तव्यतामूढतया मर्य्यादाद्यतिक्रमेण वीर्य्याधिक्येन वा वृद्धिः "तस्यातिप्रवृद्धस्य ब्राह्मणान् प्रति अनादर" इति । "अतिप्रवृद्धं प्रहितास्त्रवृष्टिभिरिति" रघुः ।

**अतिप्रश्न** पु० अतिक्रम्य मर्य्यादां प्रश्नः । मर्य्यादातिक्रमेण प्रश्ने सदुत्तरे जातेऽपि पुनर्जिज्ञासायाम् । यथा वृह-दारण्यके याज्ञवल्क्यं प्रति बालाक्यतिप्रश्नः तत्र ब्रह्ममी-मांसायाम् तेन कृतायामपि वृथातिप्रश्नकरणात् तस्य मुण्डपतनं सूर्य्यवरात् जातमिति वृहदारण्यकेऽनुसन्धेयम् ।

**अतिप्रसक्ति** स्त्री अति+प्र+सन्ज-क्तिन् । अत्यन्तासक्तौ, प्रसङ्गमतिक्रम्यान्यत्र सम्बन्धे अतिप्रसङ्गे च । लक्ष्ये लक्षण-सम्बन्धः प्रसङ्गः, अलक्ष्ये तत्सम्बन्धोऽतिप्रसङ्गः । "अति-प्रसक्त्यनापादकेति" जगदीशः ।

**अतिप्रसङ्ग** पु० अति+प्र+सन्ज घञ् । अतिप्रसक्तिपदार्थे । प्रसङ्गमतिक्रान्तवति त्रि० । [सुभूषिते च ।

**अतिप्रसिद्ध** त्रि० अति+प्र+सिध-क्त । अतिविख्याते

**अतिप्रौढा** स्त्री प्रकर्षेण उह्यतेऽत्र प्रौढः विवाहकालः प्रा०ब० अतिशयिता वा प्रौढा वृद्धियुक्ता । विवाहयोग्यकालायाम् अतिशयवृद्धियुक्तायाञ्च स्त्रियाम् स्त्रीणान्तु दशवर्षा-तीतकाल एव अतिप्रौढकालः । "अतिप्रौढा च या नारीति" स्मृतिः अतिप्रवृद्धे त्रि० ।

**अतिबल** त्रि० अतिशयितं बलं यस्याः ५ब० । अत्यन्तबलाधायि कायां पीतवर्णायां (वेड़ियाला) इति ख्यातायां लतायां, विश्वामित्रेण रामाय दत्ते अस्त्रविद्याभेदे च स्त्री । यथा "गृहाण द्वे इमे विद्ये बलामतिबलां तथा । न ते श्रमो जरा वाभ्यां भविता नाङ्गवैकृतम् ॥ न च दर्पं प्रमत्तं